देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# कच्छवंशमहाकाव्ये काव्यगुणाः

**मोहित जोशी**
श्रीसनातनधर्मसंस्कृतमहाविद्यालयः
हल्द्वानी, नैनीताल

---

**मुख्यशब्दाः-**
काव्यगुणाः, रसधर्माः, माधुर्यम्, ओजस्, प्रसादः

**शोधपत्रसारः-**
काव्ये गुणानामनिवार्यता प्रतिपादिता आलङ्कारिकैः । शौर्यादिधर्माणामिवात्मनः काव्यात्मभूतरसस्यापरिहार्योत्कर्षाधायकधर्माः गुणाः । यद्यपि एते गुणाः रसस्यैव धर्माः, न तु वर्णानां, तथापि योग्यवर्णैरपि ते अभिव्यज्यन्ते । उक्तं हि मम्मटाचार्येण –

ये रसस्याङ्गिनो धर्माः शौर्यादयः इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः[1] ॥

काव्ये गुणानां किं स्थानमित्यस्मिन् विषये वामनभोजयोः कथनमस्ति यत् काव्यानि युवतिरूपतुल्यानि सन्ति । यथा युवतीनां रूपशीलादयः सुन्दरगुणाः सुन्दरालङ्कारयोगेन अधिकरुचिकराः भवन्ति, एवं गुणहीनानि काव्यानि यौवनविहीननायिकायाः शरीरतुल्यानि सन्ति, यस्मिन् काले जनप्रियालङ्काराः अपि अप्रीतिकराः भवन्ति । अनेन सिद्ध्यति यत् काव्येषु अलङ्कारापेक्षया गुणाः नितरामपेक्ष्यन्त इति। एवमेव अन्येऽपि आलङ्कारिकाः गुणानां विषये स्वाभिप्रायं प्रकटयामासुः ।

कच्छवंशमहाकाव्यं यद्यप्यैतिहासिकं तथापि तत्र काव्यतत्त्वानां बाहुल्यं दृश्यते । सर्वेऽपि काव्यगुणाः रसानुगुणतया निबद्धाः सन्ति कविना वैद्यश्रीरामकृष्णभट्टनामकेन । तत्र,

**माधुर्यस्योदाहरणम्-**

रामसिंहात्मजः श्रीमांस्ताभिरद्भुतकान्तिभिः ।
विजहार गवाक्षेषु पुष्पतल्पसुगन्धिषु[2] ॥

**ओजोगुणस्योदाहरणम्-**

ब्रह्माण्डभाणविस्फोटविधिदक्षः समन्ततः ।
वीराणां रणधीराणां सुश्रुवे तुमुलो ध्वनिः[3] ॥
इत्थं गच्छत्स्वहःसु प्रतिभटकटकव्यूहविक्षोददक्षः
पृथ्वीराजानुमत्या दुरधिगमविलं काबिलं मंक्षु जित्वा ।
गच्छन्दिल्लीं स कच्छो यवननृपतिना घेवराघाटमध्ये

---

1 काव्य.प्र अष्टमोल्लासः -८७
2 क.वं.म.का. – ९-१६२
3 क.वं.म.का. – ४-५९

गौरीसाहेन रुद्धः पुनरधिसमरं तं गृहीत्वा मुमोच[4] ॥

**प्रसादगुणस्योदाहरणम्-**

अमात्यसार्थेन विशिष्य शिक्षितः
शुचं तनूकृत्य महीपुरन्दरः ।
नवीनतारुण्यतरङ्गितस्मरो
बभूव भूपः परिणेतुमुत्सुकः[5] ॥

एवं सर्वे काव्यगुणा अस्मिन् महाकाव्ये विलसन्तीति शम् ।

## शोधपत्रम्

काव्ये गुणानामनिवार्यता प्रतिपादिता आलङ्कारिकैः । शौर्यादिधर्माणामिवात्मनः, काव्यात्मभूतरसस्यापरिहार्योत्कर्षाधायकधर्माः गुणाः । यद्यपि एते गुणाः रसस्यैव धर्माः न तु वर्णानां, तथापि योग्यवर्णैरपि ते अभिव्यज्यन्ते । उक्तं हि मम्मटाचार्येण –

ये रसस्याङ्गिनो धर्माः शौर्यादयः इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः[6] ॥

काव्ये गुणानां किं स्थानमित्यस्मिन् विषये वामनभोजयोः कथनमस्ति यत् काव्यानि युवतिरूपतुल्यानि सन्ति । यथा युवतीनां रूपशीलादयः सुन्दरगुणाः सुन्दरालङ्कारयोगेन अधिकरुचिकराः भवन्ति, एवं गुणहीनानि काव्यानि यौवनविहीननायिकायाः शरीरतुल्यानि सन्ति, तस्मिन् काले जनप्रियालङ्काराः अपि अप्रीतिकराः भवन्ति । अनेन सिद्ध्यति यत् काव्येषु अलङ्कारापेक्षया गुणाः नितरामपेक्ष्यन्ते । उक्तं हि वामनेन – "काव्यशोभायाः कर्तारो धर्माः गुणाः[7]" । ये खलु शब्दार्थयोर्धमाः काव्यशोभां वर्धयन्ति ते गुणाः । ते च ओजः प्रसादादयः न यमकोपमादयः । कैवल्येन तेषां काव्यशोभाकरत्वात् । ओजःप्रसादादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति । भोजराजेनाप्येवं भणितम् –

युवतेरिव रूपमङ्काव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणमं निरन्तराभिः सदलङ्कारविकल्पनाभिः ॥
यदि भवति वयश्च्युतं गुणेभ्यो वपुरिवयौवनवन्ध्यमङ्गनाणाः ।
अपि जनदायतानि दुर्भगत्वं नियतमलङ्कारणानि संश्रयन्ते ॥

उक्तं हि भोजेन –

अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।
गुणयोगस्तयोर्मुख्यो गुणालङ्कर योगयोः ॥

यथा प्राणिनां शरीरेषु सारभूतात्मत्त्वस्य धर्मशौर्यौदार्यादयः गुणाः कथ्यन्ते तथैव काव्यशरीरे सारभूतरसतत्त्वस्य धर्माः माधुर्यप्रसादौजःप्रभृतयः गुणाः कथ्यन्ते । गदितं हि कविराजविश्वनाथेन –

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो गुणाः[8] ।

काव्यादर्शकारोऽपि वदति -

अस्य वैदर्भमार्गस्य प्राणाः दश गुणाः स्मृताः[9] ।

भरतमुनिनाप्युक्तम् -

श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम् ।

---

4 क.वं.म.का. – ४-८५

5 क.वं.म.का. – १४/१००

6 का.प्र अ.उ. -८७

7 का.सूत्राणि

8 सा.द अष्ट परि.

9 का. दर्श

अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणाः दशैते[10] ॥

गुणानां सङ्ख्या- अग्निपुराणे तु शब्दार्थभेदेन गुणाः एकोनविंशतिसङ्ख्यापरिमिताः सन्ति। उक्तं हि तत्र –

उच्यमानस्य शब्देन यस्य कस्यापि वस्तुनः
उत्कर्षमावहन्नर्थो गुण इत्यभिधीयते[11] ॥
श्लेषो लालित्यगाम्भीर्यौ सौकुमार्यमुदारता ।
सत्येव यौगकीचेति गुणाः शब्दस्य सप्तधा[12] ॥
माधुर्यसंविधानं च कोमलत्वमुदारता ।
प्रौढिः सामयिकत्वं च तद्भेदाः षट्चकास्ति हि[13] ॥
तस्य प्रसादः सौभाग्यं यथासङ्ख्यं प्रशस्तता ।
पाको राग इति प्राज्ञैः षट्प्रपञ्चाः प्रपञ्चिताः[14] ॥

भोजराजेन गुणानां चतुर्विंशतिप्रकारा उल्लिखिताः सन्ति । एतानेव गुणानां विद्यानाथोऽपि स्वीकरोति । यथा –

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥
ओजस्तथान्यदूर्जस्वि प्रेयानथ सुशब्दता ।
तद्वत् समाधिः सौक्ष्म्यं च गाम्भीर्यमथ विस्तरः ।
सङ्क्षेपः सम्मितत्वं च भाविकत्वं गतिस्तथा ।
रीतिरुक्तिस्तथा प्रौढिरथैषां लक्ष्यलक्षणे[15] ॥

प्राचीनानां सर्वेषामपि मतानां खण्डनं कृत्वा निर्दुष्टं सयुक्तियुक्तं गुणविभागः क्रियते मम्मटाचार्येण । यथा – "माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश"[16] । हेमचन्द्रेणापि गुणभेदा उल्लिखिताः यथा – माधुर्यौजःप्रसादास्त्रयो गुणाः[17] । आचार्यविश्वनाथेनाप्युल्लिखितं 'माधुर्यौजोऽथ प्रसाद इति ते त्रिधा'[18] इति ।

**माधुर्यगुणः** –

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्[19] । शृङ्गारे अर्थात् सम्भोगशृङ्गारे । यद्वशेन श्रोतुः मनसः द्रवीभावः सञ्जायते तद् आह्लादकत्वस्वरूपं माधुर्यमित्यर्थः । सा च द्रुतिरेवमुक्ता-

गलितत्वमिवाह्लादपद्व्या हृदये ददत् ।
माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः ॥

किञ्च- 'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्'[20] । अयं च सम्भोगशृङ्गारे ततः करुणे ततः विप्रलम्भे तस्मादपि च शान्ते क्रमेणातिशयितम्, अत्यन्तद्रुतिहेतुत्वादिति । हेमचन्द्रेणोक्तम् – द्रुतिहेतुर्माधुर्यं शृङ्गारे[21] । द्रुतिरार्द्रता गलितत्वं चेतसः । ट-ठ-ढ-

---

10 ना.शास्त्र

11 अ० पु

12 अ०पु०-३४६/५-६

13 अ०पु०-३४६/१२

14 अ०पु०-३४६/१८-१९

15 सर. कण्ठा.

16 का.प्र.८.८९

17 काव्यानुशासनम् – ४.१

18 सा.द.८.१

19 का.प्र.८.८९

20 का.प्र.८.९९

21 काव्यानुशासनम्

वर्जिताः कादयो मान्ताः, शिरसि निजवर्गान्त्ययुक्ताः ह्रस्वस्वरयुक्तौ रेफणकारौ, अल्पसमासो मध्यसमासो वा तथा सौकुमार्यवती रचना माधुर्यगुणस्य व्यञ्जिका। उक्तञ्च मम्मटाचार्येण -

'मूर्ध्नि वर्गान्यगाः स्पर्शा अटवर्गा रणो लघू।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥

उदाहरणं यथा कच्छवंशमहाकाव्ये –

रामसिंहात्मजः श्रीमांस्ताभिरद्भुतकान्तिभिः ।
विजहार गवाक्षेषु पुष्पतल्पसुगन्धिषु[22] ॥
एतस्मिन्नन्तरे दिल्लीं बुद्ध्वा प्रोषितभर्तृकाम्।
विश्वतो रुरुधुर्जट्टाः साध्वीमिव महाविटाः[23] ॥
चोचूष्यमाणचारुश्रीश्चार्वङ्गीलोचनैश्चिरम्।
स चामराञ्चलचलच्चलाचान्तश्रयोऽचलत्[24] ॥
दरमीलद्दृशा स्विन्नकम्पमानशरीरया।
राणावत्या समं रात्रौ रेमे राजा शनैः शनैः[25] ॥
विषयविमुखः श्रावं श्रावं पुराणकथास्तथा
सुकृतमनिशं कारं कारं फलाननुरोधनः ।
स्मरगुरुपदं स्मारं स्मारं विशिष्य विशुद्धधी
र्द्विजकुलमसौ नामं नामं निनाय दिनान्यसौ[26] ॥

**ओजोगुणः –**

'दीप्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः[27] ॥ अर्थात् यद्वशात् ज्वलितमिव मनो जायते तदोजः इत्यर्थः । अपि च – ''बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च[28] । वीराद् वीभत्से ततोऽपि रौद्रं च कार्यायाश्चित्तदीप्तेः सातिशयता कारणत्वमोजः क्रमेणोत्कर्षवद् भवतीति भावः वर्गस्य प्रथमतृतीयाभ्यां द्वितीयचतुर्थयोः सम्बन्धः रेफेण, अधः उपरि उभयत्र वा यस्य कस्यचिदक्षरस्य यत्र कुत्रचित्सम्बन्धः, तुल्ययोः अर्थात् तेनाक्षरेण तस्यैव अक्षरस्य सम्बन्धः, ट-ठ-ड-ढाः शकार षकारो दीर्घसमासः विकटा रचना चेति ओजोगुणव्यञ्जकाः। उक्तञ्च मम्मटेन –

योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः ।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि[29] ॥

यथा कच्छवंशमहाकाव्ये –

ब्रह्माण्डभाणविस्फोटविधिदक्षः समन्ततः ।
वीराणां रणधीराणां सुश्रुवे तुमुलो ध्वनिः[30] ॥
इत्थं गच्छत्स्वहःसु प्रतिभटकटकव्यूहविक्षोददक्षः
पृथ्वीराजानुमत्या दुरधिगमविलं काबिलं मंक्षु जित्वा।
गच्छन्दिल्लीं स कच्छो यवननृपतिना घेवराघाटमध्ये

---

22 क.वं.म.का. – ९-१६२

23 क.वं.म.का. – १०-०४

24 क.वं.म.का. – १०-२६५

25 क.वं.म.का. – १०-४५४

26 क.वं.म.का. – ११-११६

27 का.प्र.८.९२

28 का.प्र. ८.९३

29 का.प्र. ८.७५

30 क.वं.म.का. – ४-५९

गौरीसाहेन रुद्धः पुनरधिसमरं तं गृहीत्वा मुमोच[31] ॥
निजभटवधं श्रुत्वा सोमेश्वरस्य स नन्दनः
कमठपतिना प्रास्थाज्जेतुं महोबपुरप्रभुम् ।
यदजनि जयोऽजन्ये मन्ये स केवलमुच्चकैः
कमठपतिदोर्दण्डद्वन्द्वप्रचण्डिमहेतुकः[32] ॥
अस्त्रप्रयोगसंहारविस्मापितपरस्परम् ।
जजृम्भे कूर्मकायस्थराजयोर्जन्यमुच्चकैः[33] ॥

**प्रसादगुणः** –

'शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।
व्याप्नोत्यन्यत्प्रसादोऽसौ सवर्त्र विहितस्थितिः[34] ॥

अर्थात् अग्निर्यथा शुष्कमिन्धनं झटित्येव व्याप्नोति, जलं यथा स्वच्छं पटं सहसैव व्याप्नोति एवं यो गुणः चित्तं सहसैव व्याप्नोति असौ प्रसादाख्यो गुणः भवति । येन शब्देन समासेन रचनया वा श्रुतिमात्रेण शब्दादर्थज्ञानं भवेत्, स प्रसादव्यञ्जकः । उक्तञ्चाचार्यमम्मटेन –

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणो मतः[35] ॥

उदाहरणं यथा कच्छवंशमहाकाव्ये –

अमात्यसार्थेन विशिष्य शिक्षितः
शुचं तनूकृत्य महीपुरन्दरः ।
नवीनतारुण्यतरङ्गितस्मरो
बभूव भूपः परिणेतुमुत्सुकः[36] ॥

एवं काव्यगुणानां रसधर्मत्वमनेन कविना समर्थितमस्ति अस्मिन् काव्य इति शम् ।

---

31 क.वं.म.का. – ४-८५

32 क.वं.म.का. – ४-८२

33 क.वं.म.का. – ८-१५७

34 का.प्र.८.९४

35 का.प्र-८.७६

36 क.वं.म.का. – १४/१००